# N 880

Seat No. 

2023 III 10 1100 -N 880- SANSKRIT (27) (SECOND OR THIRD LANGUAGE) (SK)

(REVISED COURSE)

Time : 3 Hours | (Pages 19) | Max. Marks : 80

सूचना :


(1) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(2) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः।

(3) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।

## प्रथमः विभागः—सुगमसंस्कृतम् 8

(अ) चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4) 4

(1) 

(2) 

(3) 

(4) 


(5) 

P.T.O.

https://www.maharashtrastudy.com

(आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (3 तः 2) 2

(1) चतुरशीतिः

(2) १६

(3) सप्तनवतिः

(इ) समय-स्तम्भमेलनं कुरुत।

| 'अ' | 'आ' |
|---|---|
| (1) द्वादशवादनम् | २.३० |
| (2) पादोन-सप्तवादनम् | १२.०० |
| (3) सार्ध-द्विवादनम् | ५.५५ |
| (4) पञ्चोन-षड्वादनम् | ६.४५ |

## द्वितीयः विभागः—गद्यम् 20

(अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। 7

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः। द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः-सहभोजनम्। प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता। सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकारं पीठम्। अहम् एकस्मिन् आसने उपावेशितः। अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः। गौः अपि मञ्चं समागता। ततः अस्माकं

https://www.maharashtrastudy.com

पुरतः खाद्यस्य योजना कृता। सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम्। पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव। तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत्। अचिरादेव न इमौ परिचितौ व्याघ्रभल्लूकौ इति धेन्वा लक्षितम्। सम्भ्रमेण संशयेन च एकैकशः आवां दृष्टवती। यदा च तस्याः प्रत्ययः जातः तदा शृङ्गे उन्नम्य नौ आक्रामत्। अहमपि गर्जनां कृत्वा तीक्ष्णदन्तान् दर्शितवान्। किन्तु न किञ्चिदपि भयं तस्याः। अब्दुलः तां हस्तेन ताडितवान्। तेन क्षुब्धा सा तम् अन्वधावत्। भल्लूकः तदा चापल्येन पटमण्डपस्तम्भम् आरूढवान्। इयं सर्वा क्रीडा पूर्वनियोजिता इति विचिन्त्य प्रेक्षकाः अपि प्रमुदिताः। भल्लूकः निर्गतः इति क्रुद्धा सा धेनुः अधुना व्याघ्रं माम् लक्ष्यं कृतवती। भीत्या अहं चतुष्पादविशिष्टं व्याघ्रत्वं विस्मृत्य द्विपादं मूलस्वरूपमाश्रितवान्।

(1) **अवबोधनम्। (4 तः 3)** 3

(क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। 1

(1) .................. दशवादने सर्कसक्रीडायाः प्रारम्भः जातः।

**(प्रभाते/रात्रौ)**

(2) पूर्वमपि व्याघ्रभल्लूकौ .................. एव।

**(मानुषौ/वास्तविकौ)**

**(ख) पूर्णवाक्येन उत्तरं लिखत।** 1

**धेन्वा किं लक्षितम् ?**

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

क्रीडायाः चरमबिन्दुः समायातः–सहभोजनम्।

(घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ? 1

**P.T.O.**

https://www.maharashtrastudy.com

(2) **शब्दज्ञानम्। (3 तः 2)** **2**

(क) 2 धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत। 1

(ख) सन्धिविग्रहं कुरुत। 1

किञ्चिदपि = ........................ + ........................।

(ग) गद्यांशात् विशेषणं चित्वा लिखत। 1

(1) ........................ पीठम्।

(2) ........................ क्रीडा।

(3) **पृथक्करणम्।** **2**

क्रमेण योजयत।

(1) भल्लूकस्य पटमण्डपस्तम्भ-आरोहणम्।

(2) धेनोः सम्भ्रमः आक्रमणं च।

(3) चिमणरावस्य व्याघ्रत्वं विस्मृत्य द्विपादरूपाश्रयः।

(4) सहभोजनस्य प्रारम्भः।

**(आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** **7**

तदा पृथुभूपेन तदर्थं धनुः सज्जीकृतम्। तदा भूमिः स्त्रीरूपं धृत्वा तस्य पुरतः प्रकटिता अभवत् अवदत् च, "हे राजेन्द्र! तव पिता दुःशासकः वेनराजः राजधर्मस्य पालनं नाकरोत्। तदा मया चोरलुण्ठकभयात् धनधान्यपुष्पफलानि मम उदरे निहितानि। त्वं तु प्रजाहितदक्षः नृपः। यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि। अतः धनुः त्यज। खनित्राणि, हलान्, कुद्दालकान् लवित्राणि च हस्ते गृहीत्वा प्रजाजनैः सह कृषिकार्यं कुरु।"

https://www.maharashtrastudy.com

# 5/N 880

| |
|---|
| भूमातुः उपदेशं मनसि निधाय पृथुवैन्यः नदीनां मार्गम् अवरुध्य कृषिकार्यार्थं जलस्य उपयोगम् अकरोत्। वृष्टिजलसञ्चयं कृत्वा जलव्यवस्थापनम् अकरोत्। भूमिम् उर्वरतमां कर्तुं प्रायतत। तदनन्तरं तस्मिन् क्षेत्रे जनाः धान्यबीजानि अवपन्। स नैकेभ्यः वृक्षेभ्यः विविधप्रकारकाणां बीजानां सङ्कलनं चयनं च परिश्रमेण अकरोत्। अनन्तरं बीजानां संस्करणं कृत्वा वपनम् अकरोत्। पर्जन्यानन्तरं बीजेभ्यः अङ्कुराः उद्भूताः। |

(1) **अवबोधनम्। (4 तः 3)** 3

(क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत। 1

वेनराजः राजधर्मस्य पालनं नाकरोत् यतः ...................... ।

(1) सः दुःशासकः आसीत्।

(2) सः अलसः आसीत्।

(ख) कः कं वदति ? 1

''यदि त्वं प्रयत्नेन कृषिकार्यं करोषि तर्हि अहं प्रसन्ना भविष्यामि।''

(ग) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। 1

पृथुभूपेन खड्गं सज्जीकृतम्।

(घ) अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत। 1

<u>भूमिः</u> स्त्रीरूपं धृत्वा प्रकटिता।

(2) **शब्दज्ञानम्। (3 तः 2)** 2

(क) 2 सप्तमीविभक्त्यन्तपदे चित्वा लिखत। 1

(ख) प्रश्ननिर्माणं कुरुत। 1

पर्जन्यानन्तरं <u>बीजेभ्यः</u> अङ्कुराः उद्भूताः।

P.T.O.


https://www.maharashtrastudy.com

(ग) लकारं लिखत। 1

त्वं प्रजाजनैः सह कृषिकार्यं कुरु।

(3) **पृथक्करणम्।** **2**

**प्रवाहिजालं पूरयत।**




**(इ) माध्यमभाषया सरलार्थं लिखत। (2 तः 1)** 4

(1)

| | | |
|---|---|---|
| | | (ततः प्रविशति वैखानसः, अन्यौ तापसौ च) |
| वैखानसः | – | (राजानम् अवरुध्य) राजन्! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः। आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम्। |
| दुष्यन्तः | – | प्रतिसंहृत एषः सायकः। (यथोक्तं करोति) |
| वैखानसः | – | राजन्! समिदाहरणाय प्रस्थिता वयम्। |

https://www.maharashtrastudy.com

(2)

श्रोतृवृन्दः – नदीपूजनम् ? किमर्थं नदीपूजनम् ?

कीर्तनकारः – नदी खलु जीवनदायिनी। अतः अस्मिन्नवसरे कृतज्ञतां प्रदर्शयितुं जनाः जले दीपदानं कुर्वन्ति। द्रोणे दीपं प्रज्वाल्य नदीजले समर्पयन्ति।

जलं प्राशनार्थम्। कृषिवर्धनार्थम्।
विद्युन्निर्माणार्थम्। जलं जीवनार्थम्॥

सजीवानां कृते नदी देवितमा। नदी मातृतमा।

**(ई) माध्यमभाषया उत्तरं लिखत। (2 तः 1)** 2

(1) सुदासः किमर्थं कमलं विक्रेतुं न इच्छति ?

(2) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम् ?

## तृतीयः विभागः—पद्यम् 18

3. (अ) **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** 4

रामाभिषेके जलमाहरन्त्या
हस्तात् सृतो हेमघटो युवत्याः।
सोपानमार्गेण करोति शब्दं
ठंठं ठठं ठं ठठठं ठठं ठः॥

P.T.O.

https://www.maharashtrastudy.com

# 8/N 880

| |
|---|
| रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः |
| निरालम्बो मार्गश्चरणविकलः सारथिरपि। |
| रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः |
| क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे॥ |
| वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी। |
| तथाप्यादाय वैदेहीं कुशली न गमिष्यसि॥ |

(1) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत। (3 तः 2)** 2

(क) **पूर्णवाक्येन उत्तरं लिखत।** 1

कः शब्दं करोति ?

(ख) **चतुर्थपदं लिखत।** 1

(1) निरालम्बः मार्गः : : चरणविकलः : ..................

(2) एकम् : चक्रम् : : सप्त : ..................


(ग) **पूर्वपदं लिखत।** 1

(1) वृद्धोऽहम् = .................. + अहम्।

(2) रथस्यैकम् = .................. + एकम्।

https://www.maharashtrastudy.com

(2) जालरेखाचित्रं पूरयत।




(आ) **माध्यमभाषया उत्तरं लिखत। (2 तः 1)** 2

(1) 'विद्या नाम नरस्य ............' इति श्लोकाधारेण विद्यायाः महत्त्वं लिखत।

(2) कदा मानवता भवेत् ?

(इ) **पद्ये शुद्धे पूर्णे च लिखत। (क, ख तः 1, ग, घ तः 1)** 6

(1) (क) कं ............................................ शीतम्॥ 4

**अथवा**

(ख) यदा ............................................ व्यपगतः॥

(2) (ग) अल्पानाम ............................................ दन्तिनः॥ 2

**अथवा**

(घ) उत्तमो ............................................ प्रजायते॥ 2

P.T.O.

https://www.maharashtrastudy.com

(ई) अन्वयं पूरयत।

यावत् भयम् ........................... तावत् हि ........................... भेतव्यम्। (तथापि) ........................... तु भयं वीक्ष्य नरः ........................... कुर्यात्।

4

(उ) माध्यमभाषया सरलार्थं लिखत। (3 तः 2)

(1) शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च।
उत्साहो वर्धते येन वाचनं तद् हितावहम्॥

(2) एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम्॥

(3) वृथाभ्रमणकुक्रीडापरपीडापभाषणैः।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्॥

## चतुर्थः विभागः—लेखनकौशलम्

9

4. (अ) धातूनाम् अव्ययानां च विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (6 तः 4) 4

(क) वि + रम् (1 प. प.)

(ख) याच् (1 आ. प.)

(ग) स्निह् (4 प. प.)

(घ) परितः

(च) विना

(छ) उपरि

https://www.maharashtrastudy.com

अथवा

संस्कृतानुवादं कुरुत। (6 तः 4) 4

(1) मला खीर खूप आवडते.

I like kheer very much.

मुझे खीर बहुत पसंद है।

(2) आजी देवळात जाऊन स्तोत्र म्हणते.

Going to the temple the grandmother recites the stotra.

दादी/नानी मंदिर जाकर स्तोत्र पढ़ती है।

(3) आम्ही काल पुस्तक वाचले.

We read the book yesterday.

हमने कल किताब पढ़ी।

(4) राधिका पुजेसाठी फुले वेचते.

Radhika collects flowers for worshipping.

राधिका पूजा के लिये फूल इकट्ठा करती है।

(5) तू ग्रंथालयात काय करतो आहेस ?

What are you doing in the Library ?

तुम ग्रंथालय में क्या कर रहे हो ?

(6) गीता सायकलने शाळेत जाते.

Geeta goes to the school by bicycle.

गीता साईकल से पाठशाला जाती है।

https://www.maharashtrastudy.com

(आ) 5-7 वाक्यात्मकं निबन्धं लिखत। (3 तः 1) 5


(1) मम प्रियः नेता।

(2) मम प्रियः पुस्तकम्।

(3) मम प्रियः कविः।

अथवा

साहाय्यक-शब्दानाम् आधारेण 5-7 वाक्यात्मकं चित्रवर्णनं कुरुत। 5




(**मञ्जूषा** – तिष्ठति, विक्रीणाति, पठति, उपविशति, नयति, वहति, अवतरति, पश्यति, पिबति)

https://www.maharashtrastudy.com

## पञ्चमः विभागः—भाषाभ्यासः



(अ) तालिकापूर्तिं कुरुत। 8

(1) नामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ................ | शशिभ्याम् | ................ | तृतीया |
| ................ | ................ | वणिक्षु | सप्तमी |
| जगत् | ................ | ................ | प्रथमा |

(2) सर्वनामतालिका। (6 तः 4) 2

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ................ | आवाभ्याम्/नौ | ................ | चतुर्थी |
| ................ | ................ | कान् | द्वितीया |
| अस्याः | ................ | ................ | षष्ठी |

(3) क्रियापदतालिका। (6 तः 4) 2

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लङ् | .............. | आस्ताम् | .............. | प्रथमः पुरुषः |
| लट् | .............. | .............. | युध्यध्वे | मध्यमः पुरुषः |
| लोट् | कथयानि | .............. | .............. | उत्तमः पुरुषः |

P.T.O.

https://www.maharashtrastudy.com

(4) धातुसाधित-विशेषण-तालिका। (6 तः 4) 2

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| मन् (4 आ.प.) | मतः | .............. | मन्तव्यः | .............. |
| खाद् (1 प.प.) | .............. | खादितवान् | .............. | खादन् |
| प्रच्छ् (6 प.प.) | पृष्टः | .............. | .............. | पृच्छन् |

https://www.maharashtrastudy.com

(आ) निर्दिष्टाः कृतीः कुरुत। (4 तः 3) 9

(1) योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत। (5 तः 3) 3

(क) .............. (3) महिलाः जलमाहर्तुं गच्छन्ति।

(सङ्ख्यावाचकम्)

(ख) अस्माकं कुटुम्बं संवत्सरस्य .............. (1) पर्यटनार्थं गच्छति।

(आवृत्तिवाचकम्)

(ग) शङ्कराचार्यस्य जन्म खिस्ताब्दे .............. (8) शतके अभवत्।

(क्रमवाचकम्)

(घ) दिनस्य .............. (9) लोकयानम् आगच्छति।

(आवृत्तिवाचकम्)

(च) भगवद्गीतायाम् अष्टादशे अध्याये .............. (78) श्लोकाः सन्ति।

(सङ्ख्यावाचकम्)

https://www.maharashtrastudy.com

(2) **समासानां तालिकापूर्तिं कुरुत। (5 तः 3)** 3

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| (क) | मातृसेवा | मातुः सेवा। | ..............। |
| (ख) | मृगशृगालौ | .............. | इतरेतरद्वन्द्वः। |
| (ग) | .............. | परमः अणुः | कर्मधारयः। |
| (घ) | सकोपम् | कोपेन सह। | .............. |
| (च) | क्षुद्रबुद्धिः | .............. | बहुव्रीहिः। |

(3) **समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत। (5 तः 3)** 3

(क) रासभः = ..............................।

(ख) कृशाः × ..............................।

(ग) गृहम् = ..............................।

(घ) सुकृतम् × ..............................।

(च) सैनिकः = ..............................।



https://www.maharashtrastudy.com

(4) **सूचनानुसारं कृतीः कुरुत। (5 तः 3)**

(क) सम्यग् उक्तं त्वया। (वाच्यपरिवर्तनं कुरुत।)

(ख) तयोः विवादं श्रुत्वा सुदासः व्यमृशत्।
(त्वान्तम् अव्ययं निष्कासयते।)

(ग) त्वं द्रष्टुं शक्नोषि। ('त्वं' स्थाने 'भवान्' योजयत।)

(घ) मृगः प्रत्यहं सस्यं खादति स्म। ('स्म' निष्कासयत।)

(च) आचार्यः तं प्रपत्ताम। (लङ्लकारे परिवर्तयत।)

8

## षष्ठः विभागः—अपठितम्

4

6. (अ) **गद्यांशं पठित्वा कृतीः कुरुत। (6 तः 4)**

गङ्गातीरे एकः साधुः आसीत्। यः अपकारं करोति तस्यापि उपकारं करोति स्म सः। प्रतिदिनं सः गङ्गानद्यां स्नानं करोति स्म। एकस्मिन् दिने नदीप्रवाहे सः एकं वृश्चिकं दृष्टवान्। तं हस्तेन गृहीत्वा तीरे स्थापयितुं प्रयत्नं कृतवान्। किन्तु वृश्चिकः साधोः हस्तम् अदशत्। साधुः वृश्चिकं त्यक्तवान्। वृश्चिकः जले अपतत्। साधुः पुनः तं तीरे स्थापयितुं प्रयत्नं कृतवान्। पुनः वृश्चिकः हस्तम् अदशत्। एवम् अनेकवारं साधुः वृश्चिकं गृहीतवान्। वृश्चिकः अपि अदशत्। नदीतीरे कश्चन पुरुषः

| |
|---|
| आसीत्। सः साधुम् उक्तवान्, "साधुमहाराज! अयं दुष्टः वृश्चिकः पुनः पुनः दशति। भवान् किमर्थं तं हस्ते वृथा स्थापयति ? वृश्चिकं त्यजतु" इति। "वृश्चिकः क्षुद्रः जन्तुः। दशनं तस्य स्वभावः। सः स्वस्वभावं न त्यजति। अहं तु मनुष्यः। अहं मम परोपकारस्वभावं कथं त्यजामि ?" इति साधुः तं पुरुषम् उक्तवान्। |

(1) **पूर्णवाक्येन उत्तरं लिखत।** 1

साधुः नदीप्रवाहे कं दृष्टवान् ?

(2) **प्रातिपदिकं लिखत।**

(क) साधोः

(ख) अहम्

(3) **वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

दशनं वृश्चिकस्य स्वभावः।

(4) **माध्यमभाषया सरलार्थं लिखत।** 1

अहं मम परोपकारस्वभावं कथं त्यजामि ?

(5) गद्यांशात् लङ्लकारस्य 1 क्रियापदं चित्वा लिखत। 1

(6) **कारकपरिचयं कुरुत।** 1

<u>गङ्गातीरे</u> एकः साधुः आसीत्।

P.T.O.

https://www.maharashtrastudy.com

(आ) (1) **पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत।** 2

विरलाः जानन्ति गुणान्
विरलाः कुर्वन्ति निर्धने स्नेहम्।
विरलाः परकार्यरताः
परदुःखेनापि दुःखिताः विरलाः॥

(क) **पूर्णवाक्येन उत्तरत। (2 तः 1)** 1

(1) के गुणान् जानन्ति ?

(2) विरलाः केन दुःखिताः ?


(ख) **विरुद्धार्थकं शब्दं लिखत।** 1

गुणाः × ........................................।

https://www.maharashtrastudy.com

(2) पद्यांशं पठित्वा जालरेखाचित्रं पूरयत। 2

रविश्चन्द्रो घना वृक्षाः नदी गावश्च सज्जनाः।
एते परोपकाराय लोके देवेन निर्मिताः॥




https://www.maharashtrastudy.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से

https://www.maharashtrastudy.com